# ॥ वाल्मीकि रामायण ॥

१ बालकाण्ड

अध्याय २६

अथ तां रजनीमुष्य विश्वामित्रो महायशाः ।
प्रहस्य राघवं वाक्यमुवाच मधुराक्षरम् ॥१॥

परितुष्टोऽस्मि भद्रं ते राजपुत्र महायशः ।
प्रीत्या परमया युक्तो ददाम्यस्त्राणि सर्वशः ॥२॥

देवासुरगणान्वापि सगन्धर्वोरगानपि ।
यैरमित्रान्प्रसह्याजौ वशीकृत्य जयिष्यसि ॥३॥

तानि दिव्यानि भद्रं ते ददाम्यस्त्राणि सर्वशः ।
दण्डचक्रं महद्दिव्यं तव दास्यामि राघव ॥४॥

धर्मचक्रं ततो वीर कालचक्रं तथैव च ।
विष्णुचक्रं तथात्युग्रमैन्द्रं चक्रं तथैव च ॥५॥

वज्रमस्त्रं नरश्रेष्ठ शैवं शूलवरं तथा ।
अस्त्रं ब्रह्मशिरश्चैव ऐषीकमपि राघव ॥६॥

ददामि ते महाबाहो ब्राह्ममस्त्रमनुत्तमम् ।
गदे द्वे चैव काकुत्स्थ मोदकी शिखरी उभे ॥७॥

प्रदीप्ते नरशार्दूल प्रयच्छामि नृपात्मज ।
धर्मपाशमहं राम कालपाशं तथैव च ॥८॥

वारुणं पाशमस्त्रं च ददाम्यहमनुत्तमम् ।
अशनी द्वे प्रयच्छामि शुष्कार्द्रे रघुनन्दन ॥९॥

ददामि चास्त्रं पैनाकमस्त्रं नारायणं तथा ।
आग्नेयमस्त्रं दयितं शिखरं नाम नामतः ॥१०॥

वायव्यं प्रथमं नाम ददामि तव राघव ।
अस्त्रं हयशिरो नाम क्रौञ्चमस्त्रं तथैव च ॥११॥

शक्ति द्वयं च काकुत्स्थ ददामि तव चानघ ।
कङ्कालं मुसलं घोरं कापालमथ कङ्कणम् ॥१२॥

धारयन्त्यसुरा यानि ददाम्येतानि सर्वशः ।
वैद्याधरं महास्त्रं च नन्दनं नाम नामतः ॥१३॥

असिरत्नं महा
गान्धर्वमस्त्रं

प्रस्वापनप्रशम
दर्पणं शोषणं

मदनं चैव दु
पैशाचमस्त्रं द
प्रतीच्छ नरश

तामसं नरशा
संवर्तं चैव दु

सत्यमस्त्रं मह
घोरं तेजःप्रभ

सोमास्त्रं शि
दारुणं च भग

एतान्नाम मह
गृहाण परमो

स्थितस्तु प्राङ्
ददौ रामाय

जपतस्तु मुने
उपतस्थुर्महाह

ऊचुश्च मुदिता
इमे स्म परमो

प्रतिगृह्य च
मनसा मे भ

ततः प्रीतमन
अभिवाद्य मह

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com